# 5 जातक-कथा

## (१) उलूकजातकम्

अतीते प्रथमकल्पे जनाः एकमभिरूपं सौभाग्यप्राप्तं सर्वाकारपरिपूर्णं पुरुषं राजानमकुर्वन्। चतुष्पदा अपि सन्निपत्य एकं सिंहं राजानमकुर्वन्। ततः शकुनिगणाः हिमवत्-प्रदेशे एकस्मिन् पाषाणे सन्निपत्य 'मनुष्येषु राजा प्रज्ञायते तथा चतुष्पदेषु च। अस्माकं पुनरन्तरे राजा नास्ति। अराजको वासो नाम न वर्तते। एको राजस्थाने स्थापयितव्यः' इति उक्तवन्तः। अथ ते परस्परमवलोकयन्तः एकमुलूकं दृष्ट्वा 'अयं नो रोचते' इत्यवोचन्।

अथैकः शकुनिः सर्वेषां मध्यादाशयग्रहणार्थं त्रिकृत्वः अश्रावयत्। ततः एकः काकः उत्थाय 'तिष्ठ तावत्' अस्य एतस्मिन् राज्याभिषेककाले एवंरूपं मुखं, क्रुद्धस्य च कीदृशं भविष्यति! अनेन हि क्रुद्धेन अवलोकिताः वयं तप्तकटाहे प्रक्षिप्तास्तिला इव तत्र तत्रैव धङक्ष्यामः। ईदृशो राजा मह्यं न रोचते इत्याह–

**न मे रोचते भद्रं वः उलूकस्याभिषेचनम्।**
**अक्रुद्धस्य मुखं पश्य कथं क्रुद्धो भविष्यति।।**

स एवमुक्त्वा 'मह्यं न रोचते' 'मह्यं न रोचते' इति विरुवन् आकाशे उदपतत्। उलूकोऽपि उत्थाय एनमन्वधावत्। तत आरभ्य तौ अन्योन्यवैरिणौ जातौ। शकुनयः अपि सुवर्णहंसं राजानं कृत्वा अगमन्।

**(जातकावलि)**

## (२) नृत्यजातकम्

अतीते प्रथमकल्पे चतुष्पदाः सिंहं राजानमकुर्वन्। मत्स्या आनन्दमत्स्यं, शकुनयः सुवर्णहंसम्। तस्य पुनः सुवर्णराजहंसस्य दुहिता हंसपोतिका अतीव रूपवती आसीत्। स तस्यै वरमदात् यत् सा आत्मनश्चित्तरुचितं स्वामिनं वृणुयात् इति। हंसराजः तस्यै वरं दत्त्वा हिमवति शकुनिसङ्घे संन्यपतत्। नानाप्रकाराः हंसमयूरादयः शकुनिगणाः समागत्य एकस्मिन् महति पाषाणतले संन्यपतन्। हंसराजः आत्मनः चित्तरुचितं स्वामिकम् आगत्य वृणुयात् इति दुहितरमादिदेश। सा शकुनसङ्घे अवलोकयन्ती मणिवर्णग्रीवं चित्रप्रेक्षणं मयूरं दृष्ट्वा 'अयं मे स्वामिको भवतु' इत्यभाषत। मयूरः 'अद्यापि तावन्मे बलं न पश्यसि' इति अतिगर्वेण लज्जाञ्च त्यक्त्वा तावन्महतः शकुनिसङ्घस्य मध्ये पक्षौ प्रसार्य नर्तितुमारब्धवान् नृत्यन् चाप्रतिच्छन्नोऽभूत्। सुवर्णराजहंसः लज्जितः 'अस्य नैव ह्रीः अस्ति न बर्हाणां समुत्थाने लज्जा। नास्मै गतत्रपाय स्वदुहितरं दास्यामि' इत्यकथयत्।

हंसराजः तदैव परिषन्मध्ये आत्मनः भागिनेयाय हंसपोतकाय दुहितरमदात्। मयूरो हंसपोतिकामप्राप्य लज्जितः तस्मात् स्थानात् पलायितः। हंसराजोऽपि हृष्टमानसः स्वगृहम् अगच्छत्।

**(जातकावलि)**

# अभ्यास प्रश्न

## लघु उत्तरीय प्रश्न

१. चतुष्पदाः कं राजानम् अकुर्वन्? [2018 AH, 20 ZA, ZC]
२. शकुनिगणाः सन्निपत्य किम् व्यचारयन्?
३. काकः उलूकस्य विरोधं कथम् अकरोत्?
४. "ईदृशो राजा मह्यं न रोचते" इति कस्योक्तिः?
५. अन्ते शकुनिगणाः कं राजानम् अकुर्वन्?
६. सुवर्णराजहंसस्य दुहितुः किं नाम आसीत्?
७. हंसपोतिका पतिरूपेण कस्य वरणम् अकरोत्?
८. हंसराजः परिषन्मध्ये आत्मनः दुहितरम् कस्मै अददात्? [2019 CM]
९. हंसपोतिका कस्य दुहिता आसीत्?
१०. मयूरो हंसपोतिकामप्राप्य किम् अकरोत्?
११. हंसराजः स्वदुहितरम् कस्मै अददात्?
१२. मत्स्याः कं राजानम् अकुर्वन्? [2019 CN]

## अनुवादात्मक प्रश्न

१. **निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) अतीते ...................................................... इत्यवोचन्। [2017 MI, MK, 19 CO]

अथवा अतीते प्रथमकल्पे ...................................................... संन्यपतत्। [2019 CP]

अथवा अतीते ...................................................... न वर्तते।

अथवा अतीते ...................................................... इति उक्तवन्तः।

(ख) अथैक शकुनिः ...................................................... रोचते।

अथवा न मे रोचते ...................................................... भविष्यति। [2019 CR]

अथवा नानाप्रकाराः ...................................................... नर्तितुमारब्धवान्।

(ग) हंसराजः तस्यै ...................................................... नर्तितुमारब्धवान्।

(घ) हंसराजः तस्यै वरं ...................................................... प्रतिच्छन्नोऽभूत्।

(ङ) हंसराजः ...................................................... इत्यकथयत्।

(च) सा शकुनिसङ्घे ...................................................... स्वदुहितरं दास्यामि।

(छ) सा शकुनिसङ्घे ...................................................... इत्यकथयत्।

(ज) सुवर्णराजहंसस्य दुहिता ...... अयं मे स्वामिको भवतु इत्यभाषत्।

(झ) अतीते प्रथमकल्पे ...................................................... वृणुयात् इति। [सा० 2020ZL]

२. **निम्नलिखित सूक्तिपरक पंक्ति की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) अक्रुद्धस्य मुखं पश्य कथं क्रुद्धो भविष्यति।

(ख) अराजको वासो नाम न वर्तते।

३. **निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) राजा के बिना रहना उचित नहीं है।

(ख) शेर को राजा बनाया।

(ग) हंसपोतिका अत्यन्त सुन्दरी थी।

## व्याकरणात्मक प्रश्न

१. **निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए–**

पक्षिभिरुक्तम्, पुनरन्तरे, इत्युक्तवन्तः, मयूरादयः, अद्यापि, प्रक्षिप्तास्तिलाः।

२. **निम्नलिखित शब्दों में विभक्ति बताइए–**

पक्षिभिः, सर्वेषाम्, चतुष्पदेषु, तस्यैः, मह्यम्।

३. **निम्नलिखित क्रियापदों में पुरुष एवं वचन बताइए–**

अकुर्वन्, वर्तते, नास्ति, तिष्ठ, आह।

४. **निम्नलिखित में प्रत्यय बताइए–**

दृष्ट्वा, सन्निपत्य, स्थापयितव्यः ।

## शब्दार्थ

**जनाः** = लोगों ने। **अभिरूपम्** = विद्वान्। **सर्वाकारपरिपूर्णम्** = (सर्व+आकार-परिपूर्णम्) समस्त सुलक्षणों से परिपूर्ण। **चतुष्पदाः** = चौपाये। **सन्निपत्य** = एकत्र होकर। **शकुनिगणाःर**= पक्षीगण। **प्रज्ञायते** = जाना जाता है। **चतुष्पदेषु** = चौपायों में (पशुओं में)। **अराजकः** = राजा के बिना। **स्थापयितव्यः** = बैठाना या स्थापित करना चाहिए। **धङ्क्ष्यामः** = जल जायेंगे। **तत आरभ्य** = तब से लेकर। **दुहिता** = पुत्री। **मणिवर्णग्रीवम्** = मणि के रंग के समान गर्दनवाले। **संन्यपतन्** = एकत्रित हुए। **परिषन्मध्ये** = (परिषत् + मध्ये) सभा के बीच।